# मिथिलाभूषणाचार्यशङ्करमिश्रस्य जीवनवृत्तं वैदुष्यञ्च

**मुनीशकुमारमिश्रः**
**शोधच्छात्र, वैदिकदर्शनविभाग**
**काशीहिन्दूविश्वविद्यालयः**

भारतीयदार्शनिकचिन्तनपरम्परायाः विकासे सम्वादपरम्परायाः अत्यन्तमहत्त्वपूर्णं स्थानं वर्तते। वैदिककालादेव भारतभूमौ द्विविधा दार्शनिकविचारधारा प्रवहमाना द्वैताऽद्वैता च। वैदिकसाहित्ये यत्र **''द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते''**[१] इति रूपेण द्वैतसिद्धान्तस्योल्लेखः दृश्यते, तत्रैव अद्वैतसिद्धान्तस्यापि उल्लेखो विद्यते। यथा-

**इन्द्रं मित्रं वरुणमग्निमाहुरथो द्विव्यः स सुपर्णो गरुत्मान्।**
**एकं सद्विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः।।**[२]

उभयचिन्तनधारायाः विकासोऽवच्छिन्नरूपेण ब्राह्मणारण्यकस्मृतिपुराणेषु तथा च विभिन्नदार्शिकिसम्प्रदायेषु विराजते। चिरकालाद् भारतभूमौ प्रवहमानचिन्तनधाराया अन्यतमद्वैतधारायाः वैशेषिकदर्शनमप्येकमङ्गं वर्तते।

वैशेषिकदर्शनस्य प्रवर्तकः महर्षिकणादः वर्तते। यद्यपि प्रशस्तपादादयः बहवः विद्वांसः विद्यन्ते तथापि मिथिलाभूषणषड्दर्शननिष्णातकर्तरत्नाचार्यशङ्करमिश्रस्य वैशेषिकदर्शने विशिष्टं स्थानं वर्तते।

## शङ्करमिश्रस्य वंशपरिचयः-

मिथिलापञ्जिना[१] ज्ञायते यत् मिथिलायाम् एकः प्राचीनः 'सीहासमः' नामकः ब्राह्मणवंशः प्रसिद्ध आसीत्। अस्य वंशस्य बीजपुरुषस्य नाम पण्डितहलायुधमिश्रः आसीत्। हलायुधमिश्रस्य वंशे एको वृद्धातिवृद्धप्रपौत्रः पण्डितसुरेश्वरमिश्रो जातः। पं. सुरेश्वरमिश्रः पुरस्कारूपेण एकं ग्रामं प्रात्तवान्। पं. सुरेश्वरमिश्रस्य द्वौ सोदरौ भ्रातरौ आस्ताम्। तयोः अग्रजः पण्डितहलायुधमिश्रः तथा च पण्डितजीवेश्वरमिश्रोऽनुजः आसीत्। यतः त्रयः सोदराः भ्रातरः पुरस्काररूपेण प्रदत्तग्रामे एव न्यवसन्, तस्मात् तद्ग्रामस्य नाम 'सादरपुरम्' इति जातम्। अनन्तरं तेषां वंशस्य 'सोदरपुरवंशः' इति नाम्ना प्रसिद्धिर्जाता।

---

[१] प्रश्नोपनिषद्।
[२] ऋगवेदः।

महामहोपाध्यायः पण्डितविश्वनाथमिश्रः पण्डितसुरेश्वरमिश्रस्य पुत्रो जातः। विश्वनाथमिश्रस्य द्वितीयपत्न्याः प्रथमपुत्रः पण्डितरविनाथमिश्रः उत्पन्नः। रविनाथस्य विवाहो माण्डरवंशस्य पण्डितबटेश्वरोपाध्यायस्य पुत्र्या सह जातः। रविनाथमिश्रस्य सुपुत्रः पण्डितभवनाथमिश्रोऽभूत्।

पण्डितभवनाथमिश्रः मीमांसाशास्त्रस्य मूर्धन्यविद्वान् आसीत्। अस्यासाधारणप्रतिभायाः प्ररिचयः शङ्करमिश्रस्य कथनादपि पदे-पदे प्राप्यते। भवनाथमिश्रस्य आर्थिकस्थितिरत्यन्तं दयनीया आसीत्, किन्तु **'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः'** इति सूक्तिः भवनाथमिश्रस्य कृते अक्षरशः मानदण्डरूपा आसीत्। ते न कुत्रापि याचनार्थं गच्छन्तिस्म। स्वगृहे एव शिष्याणाम् अध्ययनाध्यापनार्जितसुखे ते स्वनिर्धनतां विस्मृतवन्तः। यथा पण्डितभवनाथमिश्रः स्वविद्यया धीरतया साक्षात् शङ्करतुल्यः आसीत् तथैव तस्य धर्मपत्नी 'भवानी' अपि साक्षाज्जगदम्बास्वरूपा एव आसीत्। भवान्याः पावनसतीत्वस्य प्रकाशे भवनाथस्य तदनन्यसाधारणः निर्मलबुद्धिवैभवधैर्यश्चैव प्रस्फुटितोऽभूत्। याचनाविमुखतायाः कारणादेव तं जनाः 'अयाची' इत्युक्तवन्तः, नत्वर्थहीनतायाः कारणात्।

पण्डितभवनाथमिश्रस्य जीवनं चिरकालपर्यन्तमध्ययनाध्यापने एव व्यतीतमभूत्। किन्तु न काऽपि सन्ततिः उत्पन्ना, अतः सः स्वधर्मपत्न्या सह वैद्यनाथज्योतिर्लिङ्गधाम गत्वा वैद्यनाथस्य आराधनायां तत्परोऽभूत्। उभयोः पूजया सन्तुष्टो भूत्वा महेश्वरः स्वप्ने उक्तवान् यत्- 'अहं स्वयं तव पुत्ररूपेण जन्म ग्रहिष्यामि''। कालान्तरे माहेश्वरकृपावशाद् भवान्याः गर्भात् साक्षात् महेश्वरो जन्म गृहीतवान्। तथा च पूर्ववरानुसारेण भवनाथमिश्रः स्वपुत्रस्य नामापि 'शङ्करः' इति कृतवान्।

एतावती प्रसिद्धिः विद्यते यत् भवनाथस्य पत्न्याः भवान्याः यदा प्रसववेदनायाः अनुभवो जातः तस्मिन्नेव काले चर्मकारस्य ढोलस्य (वाद्यविशेषः) आघातं विनैव वादनं जातम्। तत् स्थितिं दृष्ट्वा यदा चर्मकारः स्वपत्न्या सह कस्यचित् महापुरुषस्य जन्मनः शुभावसरस्य चर्चाम् अकरोत् तस्मिन्नेव काले प्रसूतिगृहे नवजातशिशोः 'शङ्करस्य' नालच्छेदनसंस्कारार्थं सन्देशः आगच्छति। संस्कारानन्तरं स्वनिर्धनतायाः कारणात् भवान्याः पार्श्वे तन्मङ्गमयक्षणेऽपि चर्मकर्त्र्यै न किमपि दत्तवती। तदा भवानी प्रतिज्ञां कृतवती यत् शङ्करस्य प्रथमार्जितं सर्वं धनं तस्यैव दास्यामि।

यदा शङ्करस्य आयुः पञ्चवर्षमपि नासीत् किन्तु पितुः प्रभावात् सः बालकः अत्यन्तं प्रौढोऽभूत्।

एकदा मिथिलायाः राजा (प्रयशः शिवसिंहः[२]) स्वयात्राप्रसङ्गे सन्ध्याकालजाते सति पण्डितभवनाथगृहस्य पार्श्वे रात्रौ विश्रामार्थं निवासं कृतवान्। राजा शङ्करमिश्रम् अन्यान्यसमवयो बालकैः सह क्रीड़ां कुर्वन्तं दृष्टवान्। 'न हि तादृशा आकृतिविशेषा गुणविरहिणो भवन्ति'। राजा शङ्करस्य ओजस्वितोपरि आकृष्टं भूत्वा स्वपार्श्वे आहूय नामपृष्टानन्तरमन्ते अध्ययनविषयेऽपि पृष्टवान्। वर्त्ताक्रमे शङ्करेण राज्ञेन पृष्टो यत्- प्रचीनं श्लोकं श्रावयामि अथवा स्वनिर्मितम्? तदा आश्चर्यान्वितो राजा उक्तवान्- किं भवान् स्वयमपि श्लोकनिर्माणं कर्तुं शक्नोति? शङ्करस्य सरस्वती निन्मश्लोकरूपेण प्रस्फुटिता जाता-

**बालोऽहं जगदानन्द न मे बाला सरस्वती।**
**अपूर्णे पञ्चमे वर्षे वर्णयामि जगत्त्रयम्।।**[३]

श्लोकश्रवणात् मुग्धः राजा शङ्करम् अन्यश्लोकमपि श्रावणार्थमुक्तवान्, तदा शङ्करमिश्रः निम्नश्लोकं श्रावितवान् यस्य उत्तरार्धः वैदिकमन्त्रः विद्यते तथा च पूर्वाधः स्वनिर्मितोऽस्ति-

**चलितश्चकितश्छिन्नः प्रयाणे तव भूपते।**
**सहस्त्रशीर्षा पुरुषः सहस्राक्षः सहस्त्रपात्।।**[४]

शङ्करस्य प्रतिभायाः उपरि प्रसन्नो भूत्वा राजा स्वकोषात् यावत्स्वर्णमुद्रां सः शिशुः एकवारे नेतुं शक्नोति तावत्स्वर्णमुद्रायै अनुमतिं दत्तवान्। राजकोषात् सम्प्रतिपञ्चसहस्त्र-स्वणमुद्रान् प्राप्य स्वगृहे आगतवान्। तत्पितरं भवनाथमिश्रं यः तत्काले बाह्यप्रकोष्ठे अध्ययनरतः आसीत्, कस्यश्चिद्विशेषपरिस्थितेराभासो जातः। अतः स्वप्रकोष्ठादेव यावत्कालपर्यन्तं गृहात् बहिःतिष्ठ इत्यादेशं दत्तवान् यदा तस्य मातुः परीक्षणं न करोति। यदा भवानी बहिः आगतवती तदा शङ्करस्य हस्ते पञ्चसहस्त्रमुद्रां दृष्ट्वा अनन्तरं भवनाथस्यानुमतिं प्राप्य भवानी पूर्वप्रतिज्ञानुसारं तत्सम्पूणस्वर्णमुद्राः चर्मकर्त्र्यै अददात्। शङ्करमिश्रस्य कीत्तिना सह स्वकीर्त्तिम् अमरकरणार्थेच्छया सा चर्मकत्री एकस्य जलह्रदस्य निर्माणं कृतवती। अद्यापि तज्जलह्रद्यः दरभङ्गाजनपदस्य सरिसवनामकग्रामे शङ्करमिश्रस्य निवासस्थानस्य पार्श्वे 'चमाईनपोखरा' इति नाम्नेन प्रसिद्धोऽस्ति।

एकदा भवनाथमिश्रः क्षुब्धह्रदयेन निम्नश्लोकस्य पाठं कुर्वन् गृहे भ्रमणं करोति-

**अधीतमध्यापितमर्जितं यशो न शोचनीयं किमपीह भूतले।**
**इतः परं किं भवनाथशर्मणः...?**

परन्तु अनेकबारं पठनानन्तरमपि तस्य बुद्धौ श्लोकस्य चतुर्थचरणं नायाति तदा शङ्करमिश्रः पितृमुखादनेकवारं श्लोकस्य त्रीण्येण चरणानि श्रुतवान् तर्हि अन्ते स्वयमेव शङ्करमिश्रः चतुर्थचरणस्य पूर्तिं कृतवान्- **''मनो मनोहारिणी जाह्ववीतटे।''**

**शङ्करमिश्रस्य समयः**

मिथिलायाः पञ्जिकायामुद्धृतवंशावल्या ज्ञायते यत् शङ्करमिश्रः पक्षधरमिश्रात् किञ्चित्पूर्ववर्त्ती तथा च यज्ञपति-उपाध्यायस्य समसामयिक अथवा पञ्चदशवर्षपूर्ववर्त्ती आसीत्। पक्षधरमिश्रस्य समयः पञ्चदशशताब्द्याः पूर्वार्धस्यान्तिमो भागः स्वीकृतः[५], एवञ्च यज्ञपति-उपाध्यायस्य समयः सार्धचतुर्दशशताब्द्याः पूर्वं १४१०-१४२० ख्रीष्टाब्दस्य पार्श्वे आसीत्।[६] अतः शङ्करमिश्रस्य कालः चतुदर्शशताब्द्यां स्वीकर्तुं शक्यते।

श्रीमिश्रकृतखण्डनखाद्यटीकायाः एका हस्तलिखितप्रतिः सम्पूर्णानन्दसंस्कृतविश्व-विद्यालये अस्ति, यस्याः समयः १५२६सम्वत् (१४७३ ख्रीष्टाब्दः) वर्तते। शङ्करमिश्र-कृतभेदप्रकाशग्रन्थस्य एको हस्तलेखः रघुनाथमन्दिरस्य पुस्तकालये वर्तते। यस्य रचना १५१९ सम्वति (१४६२ ख्रीष्टब्दे) काश्यामाचार्यस्य जीवनकाले एव जाताऽसीत्।[७] उभयप्रमाणाभ्यामपि शङ्करमिश्रस्य उक्तसमयः युक्तिसङ्गतः प्रतीयते।

**शङ्करमिश्रस्य वैदुष्यम्-**

शङ्करमिश्रः सर्वेषां शास्त्राणामध्ययनं स्वपितुरेवव कृतवान्।[८] भवनाथमिश्रः न मीमांसाशास्त्रमात्रस्य अपितु अन्यान्यशास्त्राणामपि मर्मज्ञः विद्वानासीत्। शङ्करमिश्रः विभिन्नशास्त्राणां स्वटीकाग्रन्थेषु निम्नश्लोकं लिखितवान्, येन भवनाथमिश्रस्य सर्वशास्त्रनिष्णाततत्वस्य परिज्ञानं भवति-

**स्वभ्रातुर्जीवनाथस्य व्याख्यामाख्यातवान् यतः।**
**मत्पिता भवनाथो यां तामिहाखिलमुज्ज्वलाम्॥**[९]

शङ्करमिश्रस्य पाण्डित्यं सर्वशास्त्रेषु अप्रतिहतो वर्तते। यद्यपि अस्य कृतिः प्रमुखतया न्यायवैशेषिकशास्त्रादेव सम्बद्धाऽस्ति तथापि अन्यान्यशस्त्रेष्वपि अस्य पाण्डित्यस्यापलापो नैव कर्तुं शक्यते। खण्डनखण्डखाद्यवत् गूढग्रन्थोपरि अपि अस्य लेखनी तथैव निर्बाधगत्या गता यथा न्यायलीलावत्यादिवैशेषिकशास्त्रस्य क्लिष्टतमग्रन्थोपरि गता। यद्यपि खण्डनखण्डखाद्योपरि प्राचीनार्वाचीनाचार्याणां बहव्यः व्याख्याः वर्तन्ते तथापि मिश्रस्य व्याख्या अद्भुताऽस्ति। अत एव प्रगल्भमिश्रेणोक्तम्- **''श्रीमच्छङ्करवर्धमानरचितोपायान् विलोड्यापि च।''** इति।

प्रगल्भमिश्रस्य वास्तविकं नाम 'शुभङ्कर:'[१०] आसीत्, यतोहि केवलान्वयि-अनुमानस्य व्याख्याने तथा चोपाधिवादस्यान्तेऽपि एते स्वनाम शुभङ्कर एवोक्तवान्।

षड्दर्शनवल्लभाचार्यवास्पतिमिश्रविव शङ्करमिश्रस्यापि पाण्डित्यं सर्वतन्त्रस्वतन्त्रमासीत्। न्यायवैशेषिकयो: प्राय: सर्वेषु महत्त्वपूर्णग्रन्थेषु मिश्रस्य व्याख्या टीका च वर्तते, येन तत्पाण्डित्यस्य परिज्ञानं भवति। तथा च 'भेदरत्न:' 'कणादरहस्यम्' इत्यादिस्वतन्त्रग्रन्थानापि रचना कृता। भेदरत्ने अद्वैतवादस्य मार्मिकं खण्डनं कृतवान्। भेदरत्नोपरि आचार्यमधुसूदनसरस्वतीमहोदयेन 'अद्वैतरत्नरक्षण्' नामको भेदरत्नखण्डनात्मको ग्रन्थ: विरचित:, किन्तु 'रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धु:' इति। 'आत्मतत्त्वविवेककल्पलता' इति ग्रन्थे आचार्यमिश्रस्य बौद्धन्यायस्य वैदुष्यं प्रकटितमभूत्। तत्र पूर्वपक्षिबौद्धाचार्याणां गूढ़ाशयान् प्रकाशने यद्वैदुष्यस्य परिचयं दत्तवान्, तेन प्रतीयते यत् ते बौद्धाचार्या: सन्ति। वादिविनोदे आमोदे चेति ग्रन्थयो: पूर्वमीमांसाया: पाण्डित्यं दृष्टिगोचरं भवति।

**तातादधीत्यखिलतन्त्रसारम् महार्णवादीन् बहुशो निरूप्य।**
**श्रीशङ्करेणार्चितशङ्करेण वितन्यते शब्दमणेर्मयूख:।।**[११]

शब्दमणिमयूखनामकग्रन्थस्य प्रारम्भे उल्लिखितोपरोक्तश्लोकेनापि अस्य सर्वशास्त्रावगमेन सह मीमांसाशास्त्रस्य प्रौढ़पाण्डित्यस्य परिचयो जायते, यतोहि 'महार्णव:'[१२] वत्सेश्वरस्य प्रमुखग्रन्थ: 'मीमांसामहार्णव:' एवास्ति।

व्याकरणशास्त्रे आचार्यस्य वैदुष्यं शब्दमणिमयूखे प्रकाशितं भवति, यतोहि तत्त्वचिन्तामणे: शब्दखण्डं न्यायवैशेषिकमीमांसाव्यकरणशास्त्राणां त्रिवेणी मन्यते। तत्र ग्रन्थकारेण निरापदनिमज्जनं कृत्वा स्वव्याकरणज्ञानस्य परिचयो दत्त:। न्यायकुसुमाञ्जले: आमोदटीकायां पञ्चमस्तबके तथा च न्यायलीलावतीकण्ठाभरणेऽपि यत्र-तत्र वैयाकरणत्वस्य परिचय: प्राप्यते।

अचार्यमिश्रेण न केवलं नीरसशास्त्राणामपितु सरसकाव्यशास्त्राणामपि निमज्जने लेखनी उदासीना न जाता। अस्मिन् प्रसङ्गे रसार्णवस्य श्लोक: द्रष्टव्योऽस्ति-

**तर्काभ्यासपरिश्रान्तस्वान्तविश्रान्तिहेतवे।**
**ये श्लोका विहितास्तेषां संग्रहोऽयं विधीयते।।**[१३]

उपर्युक्तसंक्षिप्तविवरणेन सुस्पष्टं जातं यत् शङ्करमिश्रस्य प्रतिभा सर्वतोभद्राऽसीत्। अत एवाचार्यस्य पाण्डित्यविषये एकः श्लोकः प्रसिद्धो वर्तते-

**शङ्करवाचस्पत्योः शङ्करवाचस्पती सदृशौ।**
**पक्षधरप्रतिपक्षी लक्षीभूतो न क्वापि।। इति।**

**शङ्करमिश्रस्य कृतित्वम्-**

आचार्यशङ्करमिश्रस्य निम्नलिखितकृतयः प्रमाणिता आसन्-

१. **मयूखः**[१४] **-** इयं चिन्तामणेः टीका अस्ति।
२. **त्रिसूत्रीनिबन्धव्याख्या-** इयं न्यायसूत्रोपरि (१-३) उदयनाचार्यस्य परिशुद्धिटीकायाः अक्षरानुसारिणी व्याख्या अस्ति। हरप्रसादशास्त्रिमहोदयः अस्याः एकमपूर्णं हस्तलेखं दिनाजपुरे प्राप्तवान्।
३. **निरुक्तिप्रकाशः -** इयमुदयनाचार्यकृतस्य प्रशस्तपादभाष्यस्य किरणावली-टीकायाः टीका अस्ति।
४. **भेदप्रकाशः**[१५] **-** अयं ग्रन्थः 'भेदरत्नम्' इति नाम्ना सरस्वतीभवने वाराणस्यां १९३३ ईस्वीये प्रकाशितोऽभूत्। प्रो. राजारामशुक्लमहोदयेन २००३ ईस्वीये अस्य ग्रन्थस्य सम्पादनं कृत्वा सम्पूर्णानन्दसंस्कृतविश्वविद्यालये सरस्वतीभवने पुनः प्रकाशनं कृतम्।[१६]
५. **आनन्दवर्धनः-** अयं ग्रन्थः 'शाङ्करी' इति नाम्ना प्रसिद्धः खण्डनखण्डखाद्यस्य टीकाग्रन्थो विद्यते। काशीहिन्दुविश्वविद्यालयेन चौखम्भासंस्कृतकार्यालयेन च हिन्दी-अनुवादेन सह प्रकाशितोऽभूत्।
६. **वादिविनोदः-** अयं लघुकायो ग्रन्थः प्रयागे १९१५ ईस्वीये डॉ. गङ्गानाथ-झामहोदयस्य सम्पादकत्वे प्रकाशितोऽभूत्।
७. **कणादरहस्यम्**[१७] **-** अस्य प्रकाशनं चौखम्भासंस्कृतकार्यालयेन १९१७ ईस्वीये कृतम्।
८. **उपस्कारः-** अयं वैशेषिकसूत्रस्य प्रामाणिकः टीकाग्रन्थः वर्तते। आचार्य-ढुण्ढिराजशास्त्रिकृतहिन्दीव्याख्यासहितं चौखम्भासंस्कृतकार्यालयेन १९९९ खीष्टाब्दे अस्य प्रकाशनम् जातम्। अस्य तृतीयसंस्करणं २००७ खीष्टाब्दे प्रकाशितम्।

९. **कण्ठाभरणम्-** अयं वल्लभाचार्यकृतन्यायलीलावतीग्रन्थस्य टीकाग्रन्थः विद्यते। प्रकाशप्रकाशिकोभयव्यख्यासम्वलितस्यास्य चौखम्भाकार्यालयेन १९३८ ख्रीष्टाब्दे प्रकाशनं जातम्।

१०. **आमोदः-** अयमुदयनाचार्यकृतन्यायकुसुमाञ्जलेः टीकाग्रन्थः वर्तते। अस्य प्रकाशनं कलकत्तायां तथा मिथिलाविद्यापीठे दरभङ्गायां जातम्।

११. **साहित्यिकग्रन्थः-** गौरीदिगम्बरप्रहसनम्, कृष्णविनोदनाटकम्, मनोभवपराभव-नाटकम्, रसावर्णवश्च वर्तन्ते।[१८] प्रो. दिनेशचन्द्रभट्टाचार्यमहोदयेन शङ्करमिश्रकृतस्य 'पण्डितविजयकाव्यम्' इति ग्रन्थस्याप्युल्लेखः कृतः।[१९]

---

[१] मिथिलावंशावलिः-पञ्जी।
[२] History of Navya-Nyaya in Mithila, P. 134
[३] उप., भू., पृ. ९।
[४] तदेव।
[५] History of Navya-Nyaya in Mithila, P. 124-25
[६] तदेव, पृ. १६३।
[७] History of Indian philosophy, Vol.2, P. 324
[८] तातादधित्यखिलतन्त्रसारम्- श. म. म. श्लो. १।
[९] न्या. ली. क., पृ. ८६४। आ. त. वि. क., पृ. ९४८। खण्डनटीका, पृ. ६३२।
[१०] Dr- Mishra- History of Indian Philosophy, Vol. 2, P- 327
[११] श. म. म., श्लो. १।
[१२] वा. वि., पृ. ५३।
[१३] Dr. Mishra- History of Indian Philosophy, Vol- 2, P. 324
[१४] वा. वि., पृ. ५६। । क. भ., पृ. ७३। उप., सू. ३.१.१४, १७।
[१५] खण्डनटीका., पृ. १२४।
[१६] सरस्वतीभवनग्रन्थमाला, ४९- सन् २००३, सं. सं. वि. वि. वाराणसी।
[१७] उप., पृ. ३२६।
[१८] History of Indian Philosophy, Vol. 2, P. 321-22
[१९] History of Navya-Nyaya in Mithila, P. 134